कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M113 विषय वैदिक
नाव. प्राणाग्निहोत्र
लेखक/लिपिकार —
पृष्ठ 4 काळ — पूर्ण/अपूर्ण

(25) Complete

(12)

সাজাগ্নীধ্র

সায়াগ্নিহোত্র

श्रा०

॥श्रीगणेशायनमः॥ ॥अथश्रावणीहोमलिख्यते॥
ॐ ऋतंत्वासत्येनपरिषिंचामितिसायंपरिषिंचति॥
सत्यंत्वर्त्तेनपरिषिंचामीतिप्रातः॥अग्निरग्निमइत्यप्र
जापतिरृषिः॥त्रिष्टुप्छंदः॥अग्निर्देवता॥अन्नसं
स्कारे विनियोगः॥ ॐ अग्निरग्निजन्मनो जातवेदाघृत
मेचक्षुरमृतंम आसन्॥अर्कस्त्रिधातूरजसोविमा
नोजस्रोघर्मोहविरग्निनाम॥ ॐ भूपतयइतित्रया

णां विवस्वानृषिः॥पंक्तिःछंदः॥अग्निर्देवता॥बलि
दाने विनियोगः॥ॐ भूःपतयेनमः॥१॥ ॐ भुवन
पतयेनमः॥२॥ॐ भूतानांपतयेनमः॥३॥ मामस्तो
कइतिकुत्सऋषिः॥जगतीछंदः॥ एकोरुद्रोदेवता
॥अन्नाभिमंत्रणे विनियोगः॥ॐ मानस्तोकेइतिऋ
चा॥१॥ ॐ नमोवःकिरिकेभ्यइतिपरमेष्ठिऋषिः॥
जगतिछंदः॥किरिकाद्दयोदेवता॥अन्नाभिमंत्रणे

प्रा०

विनियोगः॥ ॐ नमो ब्रः किरिकेभ्यः इत्येकऋचा॥१॥
ॐ नमः शंभवायेति अगस्त्यऋषिः॥ शाक्वरीछंदः॥
पर्जन्यो देवता॥ अन्नाभिमंत्रणे विनियोगः॥ ॐ नमः
शंभवे तिऋचा॥१॥ ॐ अंतश्चरसीति भूतेषु गुहायां वि
श्वतोमुखः॥ त्वं ब्रह्म त्वं यज्ञ त्वं वषट्कार॥ स्तद्विष्णोः
परमंपदं आपोज्योतिरसोमृतं ब्रह्म भूर्भुवः स्वरों॥
अमृतोपस्तरणमसि स्वाहा॥ ॐ पंचसु पंचसु प्राणे

ग्निऋषिः॥ आदित्य वैश्वानर सोम पर्जन्य वायवो दे
वता॥ बष्टंत्रा परमात्मा देवता॥ प्राणाग्निहोत्रे वि
नियोगः॥ ॐ प्राणाय स्वाहा॥ इदं प्राणाय तर्जनी
मध्यमांगुष्ठैः॥ ॐ अपानाय स्वाहा॥ इदं अपानाय
मध्यमानामिकांगुष्ठैः॥२॥ ॐ व्यानाय स्वाहा॥ इदं
व्यानाय अनामिका कनिष्ठांगुष्ठैः॥३॥ ॐ उदाना
यस्वाहा॥ इदं उदानाय तर्जनीं विना॥४॥ ॐ समा

श्रा०

नाय स्वाहा ॥ इदं समानाय सर्वांगुलिभिः ॥ ५ ॥ ततः
शिखाविसर्जनं ॥ शिखायां ब्रह्मपुत्री च बालखी
ल्यातपस्विनी ॥ विसर्गो नाम सह स्नाति शिखानु
त्किं करोतु मे ॥ अन्न ब्रह्मरसो विष्णुर्भोक्ता देव महे
श्वरः ॥ एवं ज्ञात्वा तु यो भुंक्ते अन्नदोषेन विद्यते ॥ इत्यापो
शानं ॥ अथ उत्तरापोशानं ॥ रौरवे पुण्यनिलये प
द्मार्बुदनिवासिनां ॥ अर्थिनामुदकं दत्वा अक्षय्यमुप

३

तिष्ठतु ॥ १ ॥ अन्नोच्छिष्टपिंडं भूमौ निक्षिप्य ॥ अर्द्धं पि
त्वा च गंडूषं अर्द्धं त्यजति भूमिषु ॥ प्रीणंति पितरो देवा
स्तोषा भूम्यां च देवताः ॥ ॐ अमृतापिधानमसि स्वाहेत्या
पः पीत्वा शेषं भूमौ निपातयेत् ॥ अंगुष्ठमात्रः पुरुषो ह्यं
गुष्ठं च समाश्रितः ॥ ईशः सर्वस्य जगतः प्रीणाति विश्वं
भुक् सदा ॥ इत्युत्तरापोशानं समाप्तं ॥ आहवनीयस्था
नं मुखं प्राणः ॥ उदरे गार्हपत्यस्थानं ॥ अपा० ॥ नाभौ द

प्रा०

नाय स्वाहा ॥ इदं समानाय सर्वांगुलिभिः ॥ ५ ॥ ततः
शिखा विसर्जनं ॥ शिखायां ब्रह्मपुत्री च बालली
लातपाग्विनी ॥ विसर्गो नाम सहस्त्रा लिशिखानु
शिं करोतु मे ॥ अन्न ब्रह्म रसो विष्णु भोक्ता देव महे
श्वरः ॥ एवं ज्ञात्वा तु यो भुंक्ते अन्नदोषं न विद्यते ॥ इत्यापो
शानं ॥ अथ उत्तरापोशानं ॥ रौरवे पुण्यनिलये प
द्मार्बुदनिवासिनां ॥ अर्थीनामुदकं दत्वा अक्षय्यमुप

तिष्ठतु ॥ १ ॥ अन्नोच्छिष्टशेषं भूमौ निक्षिप्य ॥ अर्द्धं पि
त्वा च गंडूषं अर्द्धं त्यजति भूमिषु ॥ प्रीणंति पितरो देवा
शेषा भूम्यां च देवताः ॥ ॐ अमृतापिधानमसि स्वाहेत्या
पः पीत्वा शेषं भूमौ निपातयेत् ॥ अंगुष्ठमात्रपुरुषो अं
गुष्ठं च समाश्रितः ॥ ईशः सर्वस्य जगतः प्रीणाति विश्व
भुक् सदा ॥ इत्युत्तरापोशानं समाप्तं ॥ आहवनीयस्था
नं मुखं प्राणा० ॥ उदरे गार्हपत्यस्थानं ॥ अपा० ॥ नाभौ द

प्रा०

क्षिणाग्नेस्थाने॥ व्याना०॥ दक्षिणे आवसथ्यस्थाने॥ उदा० उत्तरे सभ्यस्थाने॥ समा०॥ चेतसे स्वाहा॥ इति शौनकवाक्यं॥ ॥ ॥ ॥ ॥श्री॥ ॥छ॥

८

९